श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथपादुकासहस्रम् ॥

## ॥ प्रतिप्रस्थानपद्धतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ प्रतिप्रस्थानपद्धतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे।
आनृशंस्यं ययोरासीदाश्रितेष्वनवग्रहम्॥ १ ॥

भृशातुरसहोदरप्रणयखण्डनस्वैरिणा
पदेन किमनेन मे वनमिहावनादिच्छता।
इतीव परिहाय तन्निववृते स्वयं यत् पुरा
पदत्रमिदमाद्रिये धृतजगत्त्रयं रङ्गिणः॥ २ ॥

दशवदनविनाशं वाञ्छतो यस्य चक्रे
दशरथमनगोक्तिं दण्डकारण्ययात्रा।
स च भरतविमर्दे सत्यसन्धस्त्वयाऽऽसीत्
रघुपतिपदरक्षे रजधानीं प्रयान्त्या॥ ३ ॥

अभ्युपेतविनिवृत्तिसाहसा देवि ! रङ्गपतिरत्नपादुके !।
अत्यशेत भवती महीयसा पारतन्त्र्यविभवेन मैथिलीम्॥ ४ ॥

अव्याहतां रघुपतेर्वहतः प्रतिज्ञामं
साधिरोहणरसे विहते धरण्याः।
प्रादान्निवृत्य भवती मणिपादरक्षे !
स्पर्शं पदेन विगतव्यवधानखेदम्॥ ५ ॥

मन्त्राभिषेकविरहात् भजता विशुद्धिं
संस्कारवर्जनवशादभिसंस्कृतेन।
मूर्ध्ना निनाय भरतो मणिपादुके ! त्वाम्
रामाज्ञया विनिहितामिव राज्यलक्ष्मीम्॥ ६ ॥

रक्षार्थमस्य जगतो मणिपादरक्षे !
रामस्य पादकमलं समये त्यजन्त्योः।
किं दुष्करं तव विभूतिपरिग्रहो वा
किंवा विदेहदुहितुः कृपणा दशा सा॥ ७ ॥

सीतासखस्य सहसा चरणारविन्दात्
भक्त्या नते कृतपदा भरतोत्तमाङ्गे।
आरुह्य नागमभितो भवती वितेने
मायूरचामरभरं मणिरश्मिजालैः॥ ८ ॥

मूर्ध्ना मुकुन्दपदरक्षिणि ! बिभ्रतस्त्वाम्
आविर्मदस्य रघुवीरमदावळस्य।
आमोदिभिः सपदि दानजलप्रवाहैर्लभे
चिराद् वसुमती रुचिरं विलेपम्॥ ९ ॥

आशाः प्रसाधयितुमम्ब ! तदा भवत्यां
दैवादकाण्डशरदीव समुत्थितायाम्।
स्तोकावशेषसलिलाः सहसा बभूवुः
साकेतयौवतविलोचनवारिवाहाः॥ १० ॥

अन्तेवसन् अचरमस्य कवेः स योगी
वन्यान् प्रगृह्य विविधान् उपदाविशेषान्।
आतस्थुषीं रघुकुलोचितमौपवाह्यं
प्रत्युज्जगाम भवतीं भरतोपनीताम्॥ ११ ॥

मातस्त्वदागमनमङ्गळदर्शिनीनां
साकेतपक्ष्मळदृशां चटुलाक्षिभृङ्गैः।
जातानि तत्र सहसा मणिपादरक्षे !
वातायनानि वदनैः शतपत्रितानि॥ १२ ॥

साकेतसीम्नि भवती मणिपादरक्षे !
माङ्गळ्यलाजनिकरैरवकीर्यमाणा।

कीर्तिस्वयंवरपतेर्भरतस्य काले
वैवाहिकी जननै ! वह्निशिखेव रेजे॥ १३ ॥

छत्रेन्दुमण्डलवती मणिपादुके ! त्वं
व्याधूतचामरकलापशरप्रसूना।
सद्यो बभूविथ समग्रविकासहेतुः
साकेतपौरवनितानयनोत्पलानाम्॥ १४ ॥

प्रैक्षन्त वक्त्रैर्मणिपादरक्षे !
शत्रुञ्जयं शैलमिवाधिरूढाम्।
रामाभिधानप्रतिपन्नहर्षै
उत्तानितैरुत्तरकोसलास्त्वाम्॥ १५ ॥

द्रष्टुं तदा राघवपादरक्षे ! सीतामिव त्वां विनिवर्तमानाम्।
आसन् अयोध्यापुरसुन्दरीणामौत्सुक्यलोलानि विलोचनानि॥ १६ ॥

आस्थाय तत्र स्फुटबिन्दुनादं स्तम्बेरमं तादृशसन्निवेशम्।
अदर्शयस्त्वं पुरमध्यभागे पादावनि ! त्वत्प्रणवाश्रयत्वम्॥ १७ ॥

दशग्रीवस्तम्बेरमदळनदुर्दान्तहृदये
विहारस्वाच्छन्द्यात् विशति रघुसिंहे वनभुवम्।
स्ववात्सल्यक्रोडीकृतभरतशाबेब भवती
निराबाधां पादावनि ! न विजहौ कोसलगुहाम्॥ १८ ॥

कैकेयीवरदानदुर्दिननिरालोकस्य लोकस्य यत्
त्राणार्थं भरतेन भव्यमनसा साकेतमानीयत।
रामत्यागसहैरसह्यविरहं रङ्गक्षितीन्द्रस्य तत्
पादत्राणमनन्यतन्त्रफणितेरापीडामीडीमहि॥ १९ ॥

समुपस्थिते प्रदोषे सहसा विनिवृत्य चित्रकूटवनात्।
अभजत पुनर्जनपदं वत्सं धेनुरिव पादुके ! भवती॥ २० ॥

॥ इति पादुकासहस्रे प्रतिप्रस्थानपद्धतिः पञ्चमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥